# प्रातः स्मरणीयम्

## ❊ -हर्यष्टकम् ❊

हरिर्हरति पापानि दुष्टचित्तै रपि स्मृतः।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः।। १

स गंगा स गया सेतुः स काशी स च पुष्करम्।
जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम्।। २

वाराणस्यां कुरुक्षेत्रे नैमिशारण्य एव च।
यत्कृतं तेन येनोक्तं हरिरित्यक्षरद्वयम्।। ३

पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च।
तानि सर्वाण्यशेषाणि हरिरित्यक्षरद्वयम्।। ४

गवां कोटिसहस्राणि हेमकन्यासहस्रकम्।
दत्तं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम्।। ५

ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः।
अधीतस्तेन येनोक्तं हरि रित्यक्षरद्वयम्।। ६

अश्वमेधै र्महायज्ञै र्नरमेधैः स्तथैव च।
इष्टं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम्।। ७

प्राणप्रयाण-पाथेयं संसारव्याधिनाशनम्।
दुःखात्यंतपरित्राणं हरि रित्यक्षरद्वयम्।।८

बद्धः परिकरस्तेन मोक्षाय गमनं प्रति।
सकृदुच्चारितं येन हरि रित्यक्षर द्वयम्।। ९





फलश्रुति :

हर्यष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत्।
आयुष्यं बलमारोग्यं यशोवृद्धिश्श्रियावहम्।। १

प्रह्लादेन कृतं स्तोत्रं दुःखसागरशोषणम्।
यः पठेत् स नरो याति तद्विष्णोः परमं पदम्।। २

## ❊ श्रीकृष्णाष्टकम् ❊

वसुदेवसुतं देवं कंसचाणूरमर्दनम्।
देवकीपरमानंदं कृष्णं वंदे जगद्गुरुम्।। १

अतसीपुष्पसंकाशं हार नूपुर शोभितम्।
रत्नकंकणकेयूरं कृष्णं वंदे जगद्गुरुम्।। २

कुटिलालकसंयुक्तं पूर्णचंद्र निभाननम्।
विलसत् कुंडल धरं कृष्णं वंदे जगद्गुरुम्।। ३

मंदार गंधसंयुक्तं चारुहासं चतुर्भुजम्।
बर्हिपिंछावचूडांगं कृष्णं वंदे जगद्गुरुम्।। ४

उत्फुल्ल पद्म पत्राक्षं नील जीमूत सन्निभम्।
यादवानां शिरोरत्नं कृष्णं वंदे जगद्गुरुम्।। ५

रुक्मिणी केळी संयुक्तं पीतांबर सुशोभितम्।
अवाप्ततुलसी गंधं कृष्णं वंदे जगद्गुरुम्।। ६

गोपिकानां कुचद्वंद्व कुंकुमांकित वक्षसम्।
श्रीनिकेतं महेष्वासं कृष्णं वंदे जगद्गुरुम्।। ७

श्रीवत्सांकं महोरस्कं वनमाला विराजितम्।
शंख चक्र धरं देवं कृष्णं वंदे जगद्गुरुम्।। ८